# Sudhalahari in Praise of Sun by PaNDitaraj JagannAtha

# સુધાલહરી પણ્ડિતરાજશ્રીજગન્નાથવિરચિતા

## Document Information

Text title : sudhAlaharI

File name : sudhAlaharI.itx

Category : laharI, major_works, jagannAthapaNDita

Location : doc_z_misc_major_works

Author : Jagannathapandita

Transliterated by : Dhaval Patel drdhaval2785 at gmail.com

Proofread by : Dhaval Patel drdhaval2785 at gmail.com

Description-comments : A stotra of 30 verses in praise of Sun God

Latest update : September 15, 2014

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

Sudhalahari in Praise of Sun by PaNDitaraj JagannAtha

# સુધાલહરી પણ્ડિતરાજશ્રીજગન્નાથવિરચિતા

ઉલ્લાસઃ ફુલ્લપઙ્કેરુહપટલતન્મત્તપુષ્પંધયાનાં
નિસ્તારઃ શોકદાવાનલવિકલહૃદાં કોકસીમન્તિનીનામ્ ।
ઉત્પાતસ્તામસાનામુપહતમહસાં ચક્ષુષાં પક્ષપાતઃ
સંઘાતઃ કોઽપિ ધામ્નામયમુદયગિરિપ્રાન્તતઃ પ્રાદુરાસીત્ ॥ ૧॥

પદ્મદ્રોહોદ્ધુરાણાં ધવલિતહરિતામૈન્દવીનાં દ્યુતીનાં
દર્પં દ્રાગ્દ્રાવયન્તો વિદલદરુણિમોદ્રેકદેદીપ્યમાનાઃ ।
દૂરાદેવાન્ધકારાન્વિતધરણૈતલદ્યોતને બદ્ધદીક્ષા-
સ્તે દૈન્યધ્વંસદક્ષા મુદમુદયદિનોદ્વેલદુસ્રા દિશન્તુ ॥ ૨॥

ત્રાતામીવાર્તલક્ષાઃ પ્રતિદિનવિહિતાનેકગીર્વાણરક્ષા
ભક્તાનાં કલ્પવૃક્ષાઃ સ્ફુરદનલગતસ્વર્ણભાસાં સદૃક્ષાઃ ।
લોકક્ષેમાત્તદીક્ષા નલિનપરિષદાં દત્તસૌભાગ્યલાક્ષા
દુર્વૃત્તધ્વંસદક્ષા મમ રવિકિરણાઃ સન્ત્વઘાનાં વિપક્ષાઃ ॥ ૩॥

પ્રાલેયાનાં કરાલાઃ કવલિતજગતીમણ્ડલધ્વાન્તજાલાઃ
સ્નાતસ્વર્લોકપાલા વિદલદરુણિમક્ષિપ્તબાલપ્રવાલાઃ ।
વિશ્લિષ્યત્કોકબાલાજ્વરહરણભવત્કીર્તિજાલૈર્જટાલા
વ્યોમવ્યાપ્તૌ વિશાલાસ્ત્વયિ દધતુ શિવં ભાસ્વતો ભાનુમાલાઃ ॥ ૪॥

નિર્ભિદ્યે ક્ષ્મારુહાણામતિઘનમુદરં યેષુ ગોત્રાં ગતેષુ
દ્રાઘિષ્ઠસ્વર્ણદણ્ડભ્રમભૃતમનસઃ સંનિધિત્સન્તિ પાદાન્ ।
યૈઃ સંભિન્ને દલાગ્રપ્રચલહિમકણે દાડિમીબીજબુદ્ધ્યા
ચઞ્ચૂચાઞ્ચલ્યમઞ્ચન્તિ ચ શુકશિશવસ્તેઽશવઃ પાન્તુ ભાનોઃ ॥ ૫॥

અહ્નિ ક્રીડોચિતાનાં સરસિરુહલસન્મન્દિરાણાં પ્રભાતે
પ્રોદ્ઘાટ્ય દ્રાક્કપાટાન્યથ કુમુદગૃહાન્મુદ્રયન્તો વિમુક્તાન્ ।
સિઞ્ચન્તઃ કિં ચ ભૂમીતલમખિલમપિ ક્ષુણ્ણકાશ્મીરનીરૈઃ
પાયાસુઃ શ્રીસપર્યાવિરચનપટવઃ પદ્મબન્ધોઃ કરા નઃ ॥ ૬॥

આલેપા હિઙ્ગુલાનામિવ ધરણિભુજામચ્છસૌધાગ્રમૌલિ-
ષ્વગ્રેષુ ક્ષ્મારુહાણામભિનવવિદલત્પલ્લવોલ્લાસલીલાઃ ।
પ્રૌઢપ્રાલેયપુઞ્જોપરિ ચિતસ્વદિરાઙ્ગારભારા ઇવારા-
ત્પારાવારાત્પ્રયાન્તો દિનકરકિરણા મઙ્ગલં નઃ કૃષીરન્ ॥ ૭॥

કીલાલૈઃ કુઙ્કુમાનાં નિખિલમપિ જગજ્જાલમેતન્નિષિક્તં
મુક્તાશ્ચોન્મત્તભૃઙ્ગાવિદલિતકમલક્રોડકારાગૃહેભ્યઃ ।
ઉત્સૃષ્ટં ગોસહસ્રં બહલકલકલઃ શ્રૂયતે ચ દ્વિજાનાં
ભાગ્યૈર્વૃન્દારકાણાં હરિહયહરિતા સૂયતે પુત્રરત્નમ્ ॥ ૮॥

યા સૂતે સવભૂતેષ્વનુદિનમુદયે ચેતનાયા વિલાસા-
ન્યાન્તી સાયં નિકાયં જલનિધિજઠરં સંજરીહર્તિ સદ્યઃ ।
અત્યર્થં વર્ધયન્તી મણિગણસુષમાસમ્પદં રત્નસાનોઃ
સા નો ભાનોઃ પ્રભા નો નયનસરણિતો દૂરતો જાતુ યાતુ ॥ ૯॥

નીહારૈર્નીરજાનાં નિબિડતમતમોરાશિભિર્લોચનાનાં
શ્રૌતસ્માર્તક્રિયાણામપિ ખલુ નિશયા નાશમાલક્ષ્ય દૂરાત્ ।
સદ્યઃ સિન્ધોઃ સકાશાદધિકતરજવેનાગતા વાસવાશા-
માશાપાશાનશેષાનપહરતુતરાં તીક્ષ્ણભાનોઃ પ્રભા નઃ ॥ ૧૦॥

શીતે શોકં શશાઙ્કે કૃશતમરુચિતામાશુનાશં નિશાયાં
ધિક્કારં ધ્વાન્તવર્ગે કુમુદપરિષદિ પ્રોદ્ગમં દીનતાયાઃ ।
પાણ્ડિત્યં પુણ્ડરીકેષ્વનુદિનમધિકાં કાન્તિમાશાસુ તન્વ-
ન્નન્વઞ્ચત્યન્વહં ધામુષસિ કરુણયા વિશ્વવન્દ્યો વિવસ્વાન્ ॥ ૧૧॥

સ્વાપં સ્વાપાકુલાનાં ગદમથ ગદિનામન્ધકારં ત્રિલોક્યાઃ
પાપં પાપાવિલાનાં સપદિ પરિહરન્નાગતો વાસવાશામ્ ।
નિત્યપ્રસ્થાનલીલાકુપિતકમલિનીનર્મનિર્માણકર્મા
વિશ્વાર્તિત્રાણધર્મા ગગનમણિરસૌ પાતુ શર્માનિશં વઃ ॥ ૧૨॥

અન્તર્નીરં નદીનામનુદિનમુદયે બિમ્બિતા યે સમન્તા-
દ્ગીર્વાણાદ્રેરુદઞ્ચન્મણિગણજટિલાં મેદિનીં દર્શયન્તિ ।
વિપ્રપ્રોત્ક્ષિપ્તસંધ્યાઞ્જલિજલકણિકાજાલમાકાશમધ્યે
માણિક્યવ્રાતયન્તો મમ મિહિરકરા માન્દ્યમુન્મૂલયન્તુ ॥ ૧૩॥

પ્રત્યગ્રોઢાઃ પ્રગલ્ભા યુવતિપરિષદઃ પ્રોષિતપ્રાણનાથા

યસ્મિન્નસ્તાદ્રિમૌલેરુપરિમણિમયચ્છત્રલીલાં દધાને ।
સત્રાસં સપ્રસાદં પરિણતકરુણં લોચનાન્યુત્ક્ષિપન્તિ
સ્થેમાનં સ પ્રિયાણાં ઘટયતુ ભગવાન્પદ્મિનીવલ્લભો વઃ ॥ ૧૪॥

અન્તર્દ્યાવાપૃથિવ્યોરધિરજનિ ભૃતાનન્ધકારાનુદારા-
ન્વિદ્રાવ્ય દ્રાક્તદીયૈરિવ જયદરુણં શોણિતૈર્યદ્વિધત્તે ।
સાયં પ્રાતશ્ચ સંધ્યાઞ્જલિમવનિસુરાઃ સમ્પ્રયચ્છન્તિ યસ્મૈ
તસ્મૈ કસ્મૈચિદેતન્મમ પરમહંસે દેવતાયૈ નમોઽસ્તુ ॥ ૧૫॥

ત્રાણં ત્રૈવિષ્ટપાનાં તરણમથ પયસ્તોમતામ્યત્તનૂનાં
નધન્તાનામતર્ક્યં ત્રિગુણમયતયા યત્ત્રયાણાં તુરીયમ્ ।
તત્તાદૃક્તુન્દિલાયાસ્તરુણતરતમઃસંતતેરન્તકૃત્ત્વાં
તેજસ્ત્રૈલોક્યતામ્રીકરણચતુરિમ ત્રાયતાં તીક્ષ્ણભાનોઃ ॥ ૧૬॥

ગીર્વાણગ્રામણીભિર્ગગનતલગતૈર્ગીર્ભિરુદ્ગીથગાભિ-
ર્ગન્ધર્વૈશ્ચાપિ ગીતા ગુણગણગારમોદ્ગારિગાથાસહસ્રૈઃ ।
ગાહં ગાહં ગૃહાલીરગતિકગદિનાં ગન્ધયન્તો ગદાર્તિં
ગ્લાનિગ્રામં ગ્રસન્તાં ગ્રહરુચિગુરવો ગોપતેર્ગોવિલાસાઃ ॥ ૧૭॥

જીવાતુર્જાડ્યજાલાધિકજનિતરુજાં તપ્તજામ્બૂનદાભં
જઙ્ઘાલં જાઙ્ઘિકાનાં જલધિજઠરતો જૃમ્ભમાણં જગત્યામ્ ।
જીવાધાનં જનાનાં જનકમથ રુચો જીવજૈવાતૃકાદે-
ર્જ્યોતિર્જાજ્વલ્યમાનં જલજહિતકૃતો જાયતાં વો જયાય ॥ ૧૮॥

પ્રાતર્નિર્ગત્ય ગોભિઃ સહ રુચિવિષયે સંચરન્ત્યોઽહ્નિ તાભિઃ
સાકં સાયં નિકાયં પ્રતિ પુનરપિ યાઃ સમ્પ્રયાતું ત્વરન્તે ।
યાસાં દિવ્યપ્રભાવસ્ત્રિજગદઘવનશ્રેણિદાહૈકદાવઃ
ક્ષેમં તન્વન્તુ તા વઃ શિવમયવપુષો વાસરેશસ્ય ગાવઃ ॥ ૧૯॥

વૃન્દૈર્વૃન્દારકાણાં દનુતનુજનુષાં રક્ષસાં ચ ક્ષપાન્તે
ગન્ધર્વાણાં ધુરીણૈઃ પ્રણતમહિવરૈઃ કિંનરૈર્યન્નરૈશ્ચ ।
વિદ્યાં હૃદ્યાં નિજેભ્યો વિતરદવિરતં દીપ્તિભિર્દીપયદ્યા-
મદ્યાદાદ્યામવિદ્યામિદમુદયગિરેરુદ્યદર્કસ્ય બિમ્બમ્ ॥ ૨૦॥

આ પાથોજાસનાયુઃ ક્ષણલવઘટિકાદ્યાત્મકં કાલચક્રં
પ્રાહુઃ પૂર્વે પુરાણાગમવિષયવિદો યસ્ય લીલાવિલાસમ્ ।
ભાવાનાં ષડ્વિકારાનથ ખલુ ગતિભિર્યશ્ચ નિત્યં પ્રસૂતે

સ પ્રાતઃ પૌરુહૂતે પરિલસતિ હરિન્મણ્ડલે ચણ્ડભાનુઃ ॥ ૨૧॥

અઙ્ગાનિ બ્રાહ્મણાનામુષસિ હિમભરાસઙ્ગતો ભઙ્ગુરાણિ
વ્યાલક્ષ્ય દ્રાક્પ્રપાતા રિપુજનિતરુષેવારુણા વાસવાશામ્ ।
ધર્મધ્વંસોદ્ધુરાણામખિલમપિ કુલં જક્ષતઃ શોભિતક્ષ્મા
યક્ષ્માણં મે હરન્તુ ત્વરિતમઘભિદો ભાનવશ્ચણ્ડભાનોઃ ॥ ૨૨॥

વિશ્રાન્તિં બ્રાહ્મણાનાં સુખમતિશયિતં કામિનાં સ્થાયિલીલા-
મમ્ભોજાનાં પ્રબોધં કુમુદપરિષદાં યશ્ચિકીર્ષન્દયાર્દ્રઃ ।
નિર્યાત્યન્તઃસમુદ્રં સકલમપિ નૃણાં ભારમાધાય વક્ષા-
વક્ષાયાક્ષામધીશઃ સ ભવતુ ભવતાં ભૂયસે મઙ્ગલાય ॥ ૨૩॥

દ્રાગાહત્ય પ્રભાતે રજનિહિમવતઃ કૌમુદીઃ કૌતુકેન
પ્રોદ્યત્પ્રૌઢાનુકમ્પાઃ પુનરપિ ખલુ યે સાયમુજ્જીવયન્તિ ।
આરુણ્યે પલ્લવાનામથ ગુરુચરણાઃ શક્રગોપાવલીનાં
તે યુષ્મદ્ભાવલીનાં દિનકરકિરણાઃ ક્લાન્તિમુન્મૂલયન્તુ ॥ ૨૪॥

દ્રાગદ્વૈતં વિતન્વંસ્ત્રિભુવનમભિતઃ કૌઙ્કુમીનાં દ્યુતીનાં
ન્યક્કુર્વન્માન્ધ્યમુદ્રામથ રજનિરુજાં કોકસીમન્તિનીનામ્ ।
તન્દ્રાન્ધાનાન્ધ્યસિન્ધોરિહ વિતતતરૈરુદ્ધધાનં કરાગ્રૈઃ
સ્વાન્તધ્વાન્તં ધુનીતામુદયગિરિશિરશ્ચુમ્બિ માર્તણ્ડબિમ્બમ્ ॥ ૨૫॥

શુદ્ધં બ્રહ્માલવાલં પ્રકૃતિશબલિતં યસ્ય મૂલં કરાસ્ત-
દ્દ્રાધિષ્ટસ્વર્ણશાખા વિકસદરુણિમા પલ્લવાનાં વિલાસઃ ।
નીલં વ્યોમાલિમાલા સુરસફલભરો ધર્મકામાર્થમોક્ષાઃ
સ શ્રીમાન્વાઞ્છિતાર્થં વિતરતુ સતતં સૂર્યકલ્પદ્રુમો વઃ ॥ ૨૬॥

નીહારં નિમ્નગાભ્યો નિખિલનયનતો નીરજેભ્યશ્ચ નિદ્રાં
નીડેભ્યો નીડજાનાં નિકરમુષસિ યે નિત્યમુદ્વાસયન્તિ ।
સાયં તેષ્વેવ તેષાં પુનરપિ ઘૃણયા કલ્પયન્તે ચ વાસં
તે વઃ સન્તુ પ્રયાસં ઘૃણિઘનઘૃણયો હન્તુમાબદ્ધકક્ષાઃ ॥ ૨૭॥

સંહૃત્ય દ્રાગ્બહિઃસ્થં તિમિરકુલમથાભ્યન્તરં હર્તુકામા
રન્ધ્રાલીભિર્ગૃહાણામુદરમનુદિનં યે વિશઙ્કં વિશન્તિ ।
ભાનોસ્તેઽમી હૃષીકાણ્યખિલતનુભૃતાં હર્ષયન્તો હિતેહા
હૃદ્રોગં સંહરન્તાં હિમમહિમહૃતો હેમહૃદ્યાઃ કરા નઃ ॥ ૨૮॥

બ્રહ્માણ્ડં મણ્ડયન્તો વિયતિ વલયિનો મણ્ડલૈરણ્ડજાનાં
પાખણ્ડાન્દણ્ડયન્તો દનુતનુજનુષાં શોભિતાખણ્ડાલાશાઃ ।
યે ખણ્ડાન્પૌણ્ડરીકાન્વિદલયિતુમથોદ્દણ્ડપાણ્ડિત્યભાજ-
સ્તે ચણ્ડાંશોરચણ્ડાસ્ત્વરિતમિહ કરાઃ પાણ્ડુતાં ખણ્ડયન્તુ ॥ ૨૯॥

ઊર્ધ્વં પાપાવલિભ્યઃ સ્થિત ઇતિ જગદે યસ્ય વેદૈરુદાખ્યા
નિન્યુઃ કેઽપ્યાસનાર્થં ખલુ સહચરતાં નેત્રયોઃ પુણ્ડરીકમ્ ।
ઓષ્ઠાવૃક્સામ યસ્ય દ્રુતકનકનિભશ્મશ્રુકેશાખિલાઙ્ગઃ
સોઽયં સર્વાન્તરાત્મા તવ દિશતુતરાં વાસરેશઃ શિવાનિ ॥ ૩૦॥

ઇતિ પણ્ડિતરાજશ્રીજગન્નાથવિરચિતા સુધાલહરી સમાપ્તા ।

A stotra of 30 verses in praise of Sun God by Panditraj Jagannatha.

Encoded and proofread by Dhaval Patel drdhaval2785 at gmail.com

---

*Sudhalahari in Praise of Sun by PaNDitaraj JagannAtha*

pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*